अध्यायः 4

# आरम्भिक-नगराणि

## पुरातन-भवनस्य संरक्षणम्



जसपालः हरप्रीतः च स्वगृहस्य पार्श्वस्थवीथिकायां क्रिकेट्क्रीडां क्रीडन्तौ आस्ताम् । तौ अपश्यतां यत् केचन जनाः तस्य जीर्णस्य शीर्णस्य च गृहस्य प्रशंसां कुर्वन्तः आसन्, यत् गृहं वीथिकायाः बालाः भुतहागृहम् इति कथयन्ति स्म ।
काचित् अवदत् "एतस्य वास्तुकलां पश्यन्तु !"
किं भवत्या कुत्रचित् काष्ठे एतादृशी सुन्दम् उत्कीर्णम् दृष्टा अस्ति ?" अपरा महिला उक्तवती, "अस्माभिः मन्त्रिमहोदयः पत्रं लिखित्वा वक्तव्यः यत् सः एतत् सुन्दरगृहं संरक्षयितुं एतस्य जीर्णोद्धारस्य व्यवस्थां कुर्यात्" ।
इदं सर्वं श्रुत्वा जसपालः हरप्रीतः च अचिन्तयताम्, यत् अस्मिन् पुरातनजीर्णभवने जनानाम् एतादृशी प्रीतिः कस्मात् कारणात् भवितुं शक्नोति ?

## हड़प्पायाः कथा

प्रायः पुरातनभवनं स्वकथां बोधयति । प्रायः १५० वर्षेभ्यः पूर्वं यदा पञ्जाबराज्ये प्रथमवारं रेलमार्गस्य विस्तारः क्रियमाणः आसीत्, तदा तस्मिन् कर्मणि रताः अभियान्त्रिकाः सहसा हड़प्पापुरास्थलं प्राप्नुवन् यत् च आधुनिक-पाकिस्ताने अस्ति । ते चिन्तितवन्तः यत् एषः एतादृशः ध्वंसावशेषः अस्ति यतः समीचीनाः इष्टिकाः लप्स्यन्ते । इत्थं विचिन्त्य ते हड़प्पायाः ध्वंसावशेषेभ्यः सहस्राधिकाः इष्टिकाः उत्पाट्य आनयन् याभिः ते रेलमार्गं निर्मितवन्तः । एतस्मात्कारणात् अनेकानि भवनानि पूर्णतः नष्टानि अभवन् ।
तदनन्तरं प्रायः ८० वर्षेभ्यः पूर्वं पुरातत्त्वविदः एतत् स्थलम् अन्विष्टवन्तः तदा ज्ञानम् अभूत् यत् एषः ध्वंसावशेषः उपमहाद्वीपस्य सर्वपुरातनेषु नगरेषु कश्चित् अस्ति । यतो हि एतस्य नगरस्य अन्वेषणं सर्वादौ अभवत् अतः अनन्तरकाले प्राप्तेषु एतादृशेषु पुरास्थलेषु यानि भवनानि अपि च वस्तूनि लब्धानि सन्ति तानि हड़प्पासभ्यतायाः भवनानि इति उक्तानि । एतेषां नगराणां निर्माणं प्रायः ४७०० वर्षेभ्यः प्राक् अभवत् ।

प्रायः पुरातनानि भवनानि त्रोटयित्वा तेषां स्थाने नूतनानि भवनानि निर्मीयन्ते । किं भवन्तः अनुभवन्ति यत् पुरातनानि भवनानि सुरक्षितानि स्थापनीयानि ?

एतानि नगराणि आधुनिक-पाकिस्तानस्य पञ्जाबसिन्धप्रान्तयोः भारतस्य गुर्जर-राजस्थान-हरियाणा-पञ्जाबप्रान्तेषु च लब्धानि सन्ति ।एतेभ्यः सर्वेभ्यः स्थलेभ्यः पुरातत्त्वविदः विचित्राणि वस्तूनि प्राप्तवन्तः ।यथा मृण्मयानि रक्तपात्राणि येषु कृष्णवर्णीयानि चित्राणि लिखितानि आसन्, पाषाणमयानि भारमानानि मुद्राः मणीकाः ताम्रमयोपकरणानि पाषाणस्य लम्बतराणि क्षुरपत्रादीनि च आसन् ।

## एतेषां नगराणां का विशेषता आसीत् ?

एतेषु नगरेषु अनेकानि नगराणि द्वयोः अथवा द्वयधिकभागेषु विभक्तानि आसन् । प्रायः पश्चिमी भागः लघुः आसीत् परन्तु उन्नते स्थाने निर्मितः आसीत् अपि च पूर्वीभागः दीर्घः आसीत् परन्तु अयं निम्ने क्षेत्रे आसीत् । उन्नतभागः पुरातत्त्वविद्भिः नगरदुर्गः इति उक्तः अपि च निम्नभागः निम्ननगरम् इति उक्तम् अस्ति । द्वयोः भागयोः प्राकाराः पक्वेष्टिकाभिः निर्मीयन्ते स्म । एतेषाम् इष्टिकाः शोभनप्रकारेण पक्वाः भवन्ति स्म यत् सहस्रं वर्षाणां पश्चात् अद्यावधिः अपि तेषां भित्तयः स्थिराः आसन् । भित्तिं निर्मातुम् इष्टिकानां चयनं स्थापनं वा अनया रीत्या कुर्वन्ति स्म यत् भित्तयः सुदृढाः तिष्ठेयुः ।

केषाञ्चित् नगराणां नगरदुर्गेषु कानिचन विशिष्टानि भवनानि रचितानि आसन् । उदाहरणार्थं मोहनजोदडो इत्यस्मिन् कश्चित् विशिष्टः तडागः निर्मितः आसीत्, यः पुरातत्त्वविद्भिः विशेषणविशेष्ययोः सम्बन्धाभावः अस्ति । एतस्य तडागस्य निर्माणार्थम् इष्टिकानां प्लास्टर इत्यस्य च प्रयोगः कृतः आसीत् । जलस्य स्रवणं वारयितुं प्लास्टरस्य उपरि चारकोलस्य लेपः स्थापितः आसीत् । एतं तडागं प्रति गन्तुं द्वयोः भागयोः सोपानानि रचितानि आसन् अपि च परितः प्रकोष्ठाः निर्मिताः आसन् । कूपतः यत्र जलं पूर्यते स्म उपयोगस्य पश्चात् एषः रिक्तः क्रियते स्म । प्रायः अत्र विशिष्टाः जनाः विशिष्टेषु अवसरेषु स्नानं कुर्वन्ति स्म ।

कालीबंगा अपि च लोथलसदृशेषु अन्येषु नगरेषु अग्निकुण्डानि प्राप्तानि सन्ति, यत्र सम्भवतः यज्ञानि विहितानि स्युः । हडप्पा-मोहनजोदडो-लोथलसदृशेषु केषुचित् नगरेषु महान्ति सञ्चयगृहाणि प्राप्तानि सन्ति ।






महान् स्नानागारः

## भवनं नलिकाः राजमार्गाः च



हड़प्पायाः नगरेषु इष्टिकानां स्थापनं चयनं वा ।

तेषां नगराणां गृहाणि सामान्यतया तल-युक्तानि अथवा तलद्वयसहितानि भवन्ति स्म । गृहस्य प्राङ्गणं परितः प्रकोष्ठाः निर्मीयन्ते स्म। अधिकांशगृहेषु किञ्चन पृथक् अग्रे भवति स्म, अपि च केषुचित् गृहेषु कूपाः अपि भवन्ति स्म। बहुषु नगरेषु आच्छादिताः नालिकाः आसन्। तासां निर्माणं सावधानं सरलपङ्क्तौ क्रियते स्म । प्रत्येकं नालिकायां स्वल्प-नमनता भवति स्म यतः जलं सरलतया प्रवहेत् । प्रायः गृहनालिकाः राजमार्गनालिकाभिः योज्यन्ते स्म याः अनन्तरकाले दीर्घनालिकाभिः सह संयुज्यन्ते स्म । प्रणालिकानाम् आच्छादनत्वात् स्थाने स्थाने स्थाने मुख्यछिद्राणि क्रियन्ते स्म येषां माध्यमेन एतासां संरक्षणं स्वच्छता च भवितुं शक्नुयात् । गृहाणां नालिकानां राजमार्गाणां च निर्माणं योजनाबद्धरूपेण सहैव क्रियते स्म।

अत्र वर्णितेषु गृहेषु अपि च गताध्याये वर्णितेषु गृहेषु भवन्तः कां भिन्नतां पश्यन्ति ? केचन द्वे भिन्नते वदतु।

## नगरीयं जीवनम्



हड़प्पायाः नगरेषु जनसम्वर्दः स्यात् तदानीम्। अत्र तादृशाः जनाः निवासं कुर्युः ये नगरस्य विशिष्टानि भवनानि निर्मातुं योजनायां संलग्नाः भवन्ति स्म । ये सम्भवतः अत्रत्याः शासकाः आसन्। इदम् अपि सम्भाव्यते यत् ते शासकाः जनान् प्रेष्य सुदूरदेशात् धातून् बहुमूल्य-पाषाणान् अन्यानि उपयोगीनि वस्तूनि च आनाययन्ति स्म। शक्यते यत् शासकाः सुन्दराणि रत्नानि सुवर्ण-रजताभूषण-सदृशानि बहुमूल्यानि वस्तूनि स्वस्य पार्श्वे स्थापयन्ति स्म । एतेषु नगरेषु लिपिकाः अपि भवन्ति स्म, ते मुद्रासु तु लिखन्ति एव अपि च प्रायः अन्येषु वस्तुषु अपि लेखयन्ति स्म यानि अवशिष्टानि न सन्ति।

एतत् अतिरिच्य नगरेषु शिल्पकाराः स्त्री-पुरुषाः अपि निवसन्ति स्म ये गृहेषु अथवा उद्योगस्थलेषु बहुविधानि वस्तूनि निर्मान्ति स्म। जनाः सुदूरदेशानां यात्राः अपि कुर्वन्ति स्म अपि च ततः उपयोगीनि वस्तूनि आनयन्ति,

उपरितमे भागे मोहनजोदडो इत्यस्य कश्चित् राजमार्गः वर्तते तस्मिन् च काचित् नालिका निर्मिता अस्ति ।
उपरि कश्चित् कूपः ।
वामतः अधः हड्प्पायाः काचित् मुद्रा ।
एतस्याः मुद्रायाः उपरि टङ्कितानि चिह्नानि कस्याञ्चित् विशिष्टलिप्यां सन्ति । उपमहाद्वीपे प्राप्तलेखनस्य इदं प्राचीनतमम् उदाहरणम् अस्ति । विद्वांसः एतत् पठितुं प्रयासं कृतवन्तः परन्तु अधुना यावत् इदं स्पष्टं न अभवत् यत् एतस्य कः अर्थः अस्ति । दक्षिणतः अधः- पक्वमृण्मयानि क्रीडनकानि सन्ति ।



उपरि- पाषाणमयान् भारमापकान् पश्यन्तु । कियता ध्यानेन उपयुक्तोपायेन च एतेषां निर्माणं कृतम् अस्ति । एतेषां निर्माणं चर्ट-पाषाणेन कृतम् आसीत् । एतेषां निर्माणं प्रायः बहुमूल्यकानां पाषाणानां धातूनां च तोलनाय कृतं स्यात् ।
मध्ये वामतः मणिकाः । एतासु बह्व्यः कार्नीलियन-पाषाणैः निर्मितानि आसन् ।

स्म, अपि च सहैव आनयन्ति स्म सुदूरदेशानां कथाः आख्यायिकाः च । मृण्मयानि बहूनि क्रीडनकानि च प्राप्तानि सन्ति यैः बालाः क्रीडन्तः स्युः ।

नगरीयजनानां काञ्चित् सूचीं रचयन्तु । किम् एतेषु केचन एतादृशाः जनाः सन्ति, ये मेहरगढसदृशग्रामेषु निवसन्ति स्म ?



### नगराणि नूतनशिल्पानि च

आगच्छन्तु अधुना केषाञ्चित् एतादृशानां वस्तूनां विषये पठामः यानि हड्प्पायाः नगरेभ्यः प्राप्तानि सन्ति । पुरातत्त्वविदः यानि वस्तूनि तत्र प्राप्तवन्तः तेषु अधिकतराणि पाषाणमय-शङ्खमय-ताम्रमय-सुवर्णमय-रजतमयानि च आसन् । ताम्र-कांस्याभ्यां च उपकरणानि शस्त्राणि आभूषणानि पात्राणि च निर्मीयन्ते स्म । सुवर्णरजताभ्यां च आभूषणानि पात्राणि च निर्मीयन्ते स्म ।
अत्र प्राप्तेषु आकर्षकवस्तुषु रत्नानि भारमानानि फलकानि च सन्ति ।



हडप्पासभ्यतायाः जनाः पाषाणमयाः मुद्राः निर्मान्ति स्म । एतासु आयताकारासु मुद्रासु सामान्यतः पशूनां चित्राणि लभन्ते । हडप्पा-सभ्यतायाः जनाः कृष्णवर्णेन अलङ्कृतानि रक्तमृत्तिकायाः पात्राणि निर्मान्ति स्म। पश्यन्तु ६पृष्ठे।

तृतीये अध्याये भवन्तः येषां ग्रामाणां विषये पठितवन्तः किं तत्रापि धातोः उपयोगः भवति स्म ?

किं ते पाषाणमयान् भारमापकान् निर्मान्ति स्म ?

सम्भवतः ७००० वर्षेभ्यः पूर्वं मेहरगढे कार्पासस्य कृषिः भवति स्म। मोहनजोदडोतः वस्त्रखण्डानाम् अवशेषाः रजतस्य कस्यचित् पुष्पधान्याः ढौकनानि तथा च अन्यैः ताम्रस्य वस्तुभिः संश्लिष्टानि आसन् तानि प्राप्तानि सन्ति। पक्वमृत्तिकया तथा च फेयन्स इत्यनेन निर्मित-तन्तु-कीलाः कार्पासवयनं सङ्केतयन्ति।

एतेषु अधिकांशवस्तूनां निर्माणं विशेषज्ञाः कृतवन्तः आसन् । विशेषज्ञः सः उच्यते यः कस्यचित् विशिष्टवस्तुनः निर्माणार्थं विशिष्टरूपेण प्रशिक्षितः भवति यथा- पाषाणस्य विलेखनम्, रत्नानां द्युतिकरणम् अथवा पुनः मुद्रासु विशिष्टविलेखनम् । षड्त्रिंशत्तमे पृष्ठे चित्रं पश्यन्तु यत् प्रतिमायाः मुखं कियताकर्षकरूपेण रचितम् अस्ति अपि च तस्य श्मश्रूणि कियता शोभनप्रकारेण दर्शितानि सन्ति । इदं कार्यं कस्यचित् विशेषज्ञमूर्तिकारस्य एव भवितुं शक्नोति।

प्रत्येकं जनः विशेषज्ञः न भवितुं शक्नोति स्म। अस्माभिः इदं न ज्ञातं यत् केवलं पुरुषाः एव एतादृशानां कार्याणां कृते प्रशिक्षणं स्वीकुर्वन्ति स्म अथवा पुनः केवलं महिलाः एव। प्रायः काश्चन महिलाः अपि च केचन पुरुषाः द्वौ एव एतस्मिन् कर्मणि दक्षाः आसन्।

पाषाणान् कर्तयित्वा विलेख्य आकृष्य च मणिकाः निर्मिताः। एताः मध्यभागात् छिद्रिताः आसन् यतः सूत्रं स्थापयित्वा मालायाः निर्माणं कर्तुं शक्नुयात्। मध्ये दक्षिणतः तीक्ष्णफलकम् अधः वामतः – चित्रितं अलङ्कृतवस्त्रं वा ।

कस्यचित् महत्त्वपूर्णस्य जनस्य पाषाणमयी प्रतिमा या मोहनजोदडोतः लब्धा आसीत् । एतस्यां सः जनः अलङ्कृतवस्त्रेषु दर्शितः अस्ति ।



फेयन्स

पाषाणाः शङ्खाः च प्राकृतिकरूपेण प्राप्यन्ते परन्तु फेयन्सं कृत्रिमरूपेण सज्जीक्रियते । सिकतायाः अथवा स्फटिकपाषाणानां चूर्णं निर्यासे मेलयित्वा तेन वस्तूनि निर्मीयन्ते स्म । तदनन्तरं तेषु वस्तुषु कश्चित् स्निग्धलेपः आरोप्यते स्म । एतस्य स्निग्धलेपस्य वर्णाः प्रायः नीलाः अथवा समुद्रवर्णीयाः भवन्ति स्म । फेयन्स इत्यनेन रत्नानि वलयानि कर्णाभरणानि लघूनि पात्राणि च रच्यन्ते स्म ।



### असंशोधितसामग्र्याः अन्वेषणे

असंशोधितसामग्री ते पदार्थाः उच्यन्ते ये प्राकृतिकरूपेण लभ्यन्ते अथवा कृषकाः पशुपालकाः च तेषाम् उत्पादनं कुर्वन्ति यथा काष्ठधातूनां अयस्काः प्राकृतिकरूपेण उपलब्धाः असंशोधितपदार्थाः सन्ति । एतैः पुनः अनेकप्रकारकाणि वस्तूनि निर्मीयन्ते । उदाहरणार्थं कृषकैः उत्पादितकार्पासः असंशोधितपदार्थः इति उच्यते यतः वयनस्य पश्चात् वस्त्रं सज्जीक्रियते । हडप्पायां जनाः बहूनि वस्तूनि तत्र एव प्राप्नुवन्ति स्म परन्तु ताम्र-लौह-सुवर्ण-रजत-बहूमूल्यपाषाणसदृशानां पदार्थानां आनयनं ते दूरदेशात् कुर्वन्ति स्म ।



हड़प्पायाः जनाः ताम्रस्य आनयनं सम्भवतः वर्तमान-राजस्थानतः कुर्वन्ति स्म । पश्चिमैशियादेशात् ओमानतः अपि ताम्रस्य आनयनं क्रियते स्म । कांस्यस्य निर्माणार्थं ताम्रे मिश्रयितुं टिन इति धातोः आनयनम् आधुनिक-ईरानतः अफगानिस्तानतः च क्रियते स्म । सुवर्णस्य आनयनम् आधुनिककर्णाटकात् बहुमूल्यपाषाणस्य च आनयनं गुर्जरात् ईरानतः अफगानिस्तानतः च क्रियते स्म ।



वस्तूनि एकस्मात् स्थानात् अपरं स्थानं प्रति कथं नीयन्ते स्म ?

एतानि चित्राणि पश्यन्तु । कञ्चित् क्रीडनकम् अस्ति अपि च अपरा काचित् मुद्रा ।

किं भवन्तः वक्तुं शक्नुवन्ति यत् हड़प्पायाः जनाः यातायाताय केषां साधनानां प्रयोगं कुर्वन्ति स्म ?

किं गताध्यायेषु चक्रयुक्तवाहनानां विषये भवद्भ्यः सूचनाः प्रदत्ताः सन्ति ?

बालानां क्रीडनकं हलम् । अद्य हलचालकाः अधिकतराः कृषकाः पुरुषाः भवन्ति । अस्माभिः न ज्ञातं यत् किं हडप्पायाम् अपि एषा एव प्रथा आसीत् ।

### नगरीयाणां कृते भोजनम्

जनाः नगराणि अतिरिच्य ग्रामेषु अपि निवसन्ति स्म । ते अन्नानि उत्पादयन्ति स्म अपि च पशून् पालयन्ति स्म । कृषकाः पशुचारकाः एव नगरेषु जीवमानानां शासकानां लेखकानां शिल्पकाराणां च कृते भोज्यपदार्थान् यच्छन्ति स्म । पादपानाम् अवशेषेभ्यः ज्ञायते यत् हड़प्पायाः जनाः गोधूम-यव-द्विदल-हरेणु-ब्रीहि-तिल-सर्षपादीनाम् उत्पादनं कुर्वन्ति स्म ।



भूमेः कर्षणार्थं हलस्य प्रयोगः किञ्चित् नूतनम् आसीत् । हडप्पाकालीनाः हलाः तु अवशिष्टाः न सन्ति यतो हि प्रायः काष्ठमयाः भवन्ति स्म परन्तु हलाकारकाणि क्रीडनकानि लब्धानि सन्ति । क्षेत्रेऽस्मिन् वर्षाः न्यूनाः भवन्ति अतः सेचनाय जनैः केचन उपायाः कृताः स्युः । सम्भवतः जलस्य सञ्चयः क्रियते स्म अपि च आवश्यकतायां सत्यां ततः सस्यानां सेचनं क्रियते स्म ।

हड़प्पायाः जनाः गो-महिषी-अजावीनां च पालनं कुर्वन्ति स्म । ग्रामाणां समीपे तडागाः चारणस्थानानि च भवन्ति स्म । परन्तु शुष्कमासेषु पशूनां समूहाः भोजनस्य अन्वेषणे दूरदेशं प्रति नीयन्ते स्म । ते बदरीसदृशानि फलानि एकत्रीकुर्वन्ति स्म मत्स्यग्रहणं कुर्वन्ति स्म अपि च हरिणसदृशानां पशूनाम् आखेटं कुर्वन्ति स्म ।

## गुर्जरे हडप्पाकालीनस्य नगरस्य सूक्ष्मनिरीक्षणम्

कच्छक्षेत्रे खदिरबेतस्य तटे धौलावीरानामकं नगरम् आसीत् । तत्र स्वच्छं जलं लभ्यते स्म अपि च भूमिः उर्वरा आसीत् । यत्र हडप्पासंस्कृतेः नगरद्वयं द्वयोः भागयोः विभक्तम् आसीत् तत्र च धौलावीरानगरं त्रिषु भागेषु विभाजितम् आसीत् । एतस्य प्रत्येकं भागं परितः पाषाणमयी उन्नतभित्तिः निर्मिता आसीत् । एतस्य अन्तः प्रवेष्टुं च बृहन्ति द्वाराणि आसन् । एतस्मिन् नगरे किञ्चन अनाच्छादितक्षेत्रम् अपि आसीत् यत्र सार्वजनिककार्यक्रमाः आयोज्यन्ते स्म । अत्र प्राप्तेषु केषुचित् अवशेषेषु हडप्पालिपेः दीर्घाक्षराणि पाषाणेषु विलिखितानि आसन् । एते अभिलेखाः प्रायः काष्ठालङ्कृताः आसन् । अयं कश्चित् विचित्रः अभिलेखः अस्ति यतो हि सामान्यतया हड़प्पायाः लेखाः मुद्रासदृशेषु लघुवस्तुषु प्राप्यन्ते ।

लोथलस्य पोतस्थानकम् । अयं गरीयान् तडागः लोथलस्य पोतस्थानकं स्यात्, यत्र समुद्रमार्गीयाः नावः तिष्ठन्ति स्म । सम्भवतः अत्र सामग्रीणाम् अवरोहणम् आरोहणं क्रियते स्म ।



गुर्जरस्य खम्भातस्य आखाते प्राप्यमाणा साबरमत्याः कस्याश्चित् उपनद्याः तटे स्थितं लोथलनगरम् एतादृशे स्थाने स्थितम् आसीत्, यत्र बहुमूल्य-पाषाण-सदृशासंशोधित-पदार्थः सरलतया लभ्यते स्म । एतत् पाषाण-शङ्ख-धातुभिः निर्मितवस्तूनां किमपि महत्त्वपूर्णं केन्द्रम् आसीत् । एतस्मिन् नगरे किञ्चन सञ्चयगृहम् अपि आसीत् । एतस्मात् सञ्चयगृहात् अनेकाः मुद्राः मुद्राङ्कनम् अथवा मुद्राचिहन्नानि (क्लिन्नमृत्तिकायां नोदनात् जातचिह्नानि) लब्धानि सन्ति ।



मुद्रा(मुहर)अपि च मुद्राङ्कनं अथवा मुहरबन्दी

मुद्राणां प्रयोगः सामग्र्या पूरितानि तानि पुटकानि अथवा तान् स्यूतान् च चिह्नीकर्तुं क्रियते स्म यानि एकस्मात् स्थानात् पृथक्स्थानं प्रति प्रेष्यन्ते स्म । स्यूतानां पिधानस्य पश्चात् मुखेषु क्लिन्नमृत्तिकां लेपयित्वा तेषु मुद्रांकनं क्रियते स्म । मुद्रायाः अङ्कनम् एव मुहरबन्दी इति उच्यते ।

यदि एतत् अङ्कनं त्रुटितं न भवति स्म तर्हि ततः अनुमीयते स्म यत् वस्तु यथावत् अस्ति वस्तुना सह न कापि कुचेष्टा जाता ।

अद्य अपि मुद्रायाः प्रयोगः भवति । अन्वेषयन्तु यत् मुद्राङ्कनं प्रयोगः किमर्थं भवति स्म ।

अत्र किञ्चन भवनं प्राप्तम् अस्ति, यत्र सम्भवतः मनके इति निर्माणस्य कार्यं भवति स्म । पाषाणस्य खण्डाः, अर्धसाधितानि मनके इति, मनके इति निर्माणस्य उपकरणानि निर्मितानि मनके इति च अत्र अलभ्यन्त ।

### सभ्यतायाः समाप्तेः रहस्यम्

प्रायः ३९००वर्षेभ्यः पूर्वं कश्चित् महत्परिवर्तनं दृष्टिगोचरं भवति । सहसा जनाः एतानि नगराणि अत्यजन् । लेखन-मुद्रा-भारमापकानां च प्रयोगः व्यवहारपथात् अपगतः । दूरदेशात् असंशोधितसामग्र्याः आनयनं न्यूनम् अभवत् । मोहनजोदडो राजमार्गेषु अवकरचयाः जाताः । जलनिकासप्रणाली नष्टा जाता, राजमार्गेषु एव पर्णकुटीरसदृशानि गृहाणि निर्मातुं जनाः आरभन्त ।

एतत् सर्वं कस्मात् कारणात् अभवत् ? न किञ्चित् ज्ञायते । केषाञ्चित् विदुषां मान्यता अस्ति यत् नद्यः शुष्काः जाताः आसन् । अपरेषां कथनम् अस्ति यत् वनानां नाशः जातः आसीत् । एतस्य कारणम् इदं भवितुं शक्नोति यत् इष्टिकानां दार्ढ्यार्थं ईन्धनस्य आवश्यकता भवति । एतत् अतिरिच्य पशूनां व्यापकसङ्ख्यायां समूहाः घासक्षेत्रेषु चरन्ति स्म ततः घासक्षेत्राणि समाप्तानि जातानि स्युः । केषुचित् क्षेत्रेषु जलप्लावनं जातम् । परन्तु एतैः कारणैः इदं स्पष्टं न जातं यत् सर्वेषां नगराणाम् अन्तः समाप्तिः वा कथं जाता । यतो हि जलौघस्य शुष्क-नदीनां च प्रभावः केषुचित् एव क्षेत्रेषु जातः स्यात् ।

इत्थम् अनुभूयते यत् शासकानां नियन्त्रणं समाप्तं जातम् । यत्किमपि जातं स्यात् परिवर्तनस्य प्रभावः स्पष्टतया दृश्यते । आधुनिकपाकिस्तानस्य सिन्ध-पञ्चनदयोः निवासाः (वस्तियां) भूमिसात् जाताः आसन् । बहवः जनाः पूर्वदक्षिण-क्षेत्रेषु नूतनेषु निवासेषु लघुनिवासेषु च गत्वा अवसन् ।

एतस्याः घटनायाः प्रायः १४०० वर्षाणां पश्चात् नूतननगराणां विकासः अभवत् । एतेषां विषये भवन्तः षष्ठाध्याये नवमाध्याये च पठिष्यन्ति ।

**अन्यत्र**

स्वमानचित्रे मिस्रम् अन्वेषयन्तु । नीलनद्याः पार्श्वस्थानि क्षेत्राणि परित्यज्य मिश्रस्य अधिकांशभागः मरुस्थलीयः अस्ति ।



प्रायः ५००० वर्षेभ्यः पूर्वं मिश्रस्य शासकाः सुवर्ण-रजत-हस्तिदन्त-काष्ठ-हीरक-रत्नानि च आनेतुं स्वसेनाः सुदूरदेशान् प्रति प्रेषितवन्तः आसन् । ते दीर्घाणि स्मारकाणि निर्मापितवन्तः यानि पिरामिड इति नाम्ना ज्ञायन्ते ।

नृपेषु मृतेषु सत्सु तेषां शवाः एतेषु पिरामिड इत्येतेषु भूमिसात् कृत्वा सुरक्षिताः स्थाप्यन्ते स्म । एतेषां शवानां कृते ममी इति शब्दस्य प्रयोगः भवति स्म । तैः शवैः सार्धम् इतोऽपि अन्यानि वस्तूनि भूमिसात् क्रियन्ते स्म । एतेषु खाद्यान्न-पेय-वस्त्राभूषण-पात्र-वाद्ययन्त्र-शस्त्र-पशवः सम्मिलिताः सन्ति । यदा कदा शवेन सह तेषां सेवकाः सेविकाः च अपि भूमिसात् क्रियन्ते स्म । विश्वस्य इतिहासे शवानां भूमिसात्करणस्य परम्परां पश्यन् मिश्रे सर्वाधिकानि धनानि सम्पत्तयः च व्ययीक्रियन्ते स्म ।

किं भवन्तः अनुभवन्ति यत् मृत्योः पश्चात् एतेषां नृपाणां कृते एतेषां वस्तूनाम् आवश्यकता जाता स्यात् ?

**कल्पयन्तु**

भवन्तः स्वमातृ-पितृभ्यां सह ४००० वर्षेभ्यः पूर्वं लोथलतः मोहनजोदडो इत्यस्य यात्रां कुर्वन्ति । भवन्तः ज्ञापयन्तु यत् भवन्तः कथं यात्रां करिष्यन्ति, भवतां मातापितरौ यात्रायाः कृते आत्मभिः सह किं किं नेष्यन्ति ? अपि च मोहनजोदडो इत्यत्र भवन्तः किं द्रक्ष्यन्ति ?

उपयोगि-शब्दाः

नगरम्
नगरदुर्गः
शासकः
लिपिकः
मुद्रा (मुहर)
शिल्पकारः
धातुः
विशेषज्ञः
असाधितसामग्री (कच्चा माल)
हलम्
सेचनम्

**काश्चन महत्त्वपूर्णतिथयः**

- मेहरगढे कार्पासस्य कृषिः(प्रायः ७००० वर्षेभ्यः प्राक्)
- नगराणाम् आरम्भः (प्रायः ७००वर्षेभ्यः पूर्वम्)
- हड़प्पायाः नगराणाम् अन्तस्य अर्थात् समाप्तेः प्रारम्भः (प्रायः ३९०० वर्षेभ्यः प्राक्)
- अन्येषां नगराणां विकासः (प्रायः २५०० वर्षेभ्यः प्राक्)

## आगच्छन्तु स्मरणं कुर्मः



1. पुरातत्त्वविदः कथं ज्ञातवन्तः यत् हडप्पासंस्कृतेः काले वस्त्रस्य उपयोगः भवति स्म ?
2. निम्नलिखितस्य सुमेलनं कुर्वन्तु-

| | |
|---|---|
| ताम्रम् | गुर्जरः |
| सुवर्णम् | अफगानिस्तानम् |
| टिनधातुः | राजस्थानम् |
| बहुमूल्यपाषाणः | कर्नाटकः |

3. हड़प्पायाः जनानां कृते धातु-लेखन-चक्र-हलानि च किमर्थं महत्त्वपूर्णानि आसन् ?

## आगच्छन्तु चर्चयामः



4. अस्मिन् अध्याये पक्वमृत्तिकया (टेरा-कोटा) निर्मितानां सर्वेषां क्रीडनकानां सूचीं कुर्वन्तु। एतेषु कानि क्रीडनकानि बालकेभ्यः आधिक्येन रुचितानि स्युः ?
5. हड़प्पायाः जनानां भोजनसामग्र्याः सूचीं कुर्वन्तु। वर्तमानकाले एतासु भवन्तः किं किं खादन्ति ? चिह्नीकृत्य ज्ञापयन्तु।
6. हड़प्पायाः कृषकाणां पशुपालकानां च जीवनं किं तेभ्यः कृषकेभ्यः भिन्नम् आसीत्, येषां विषये भवन्तः गताध्यायेषु पठितवन्तः सन्ति ? स्वकीये उत्तरे एतस्य कारणं ज्ञापयन्तु।

## आगच्छन्तु कृत्वा पश्यामः



7. स्वस्य नगरस्य अथवा ग्रामस्य त्रयाणां महत्त्वपूर्णभवनानां विवरणं यच्छन्तु। किं तानि निवासस्य महत्त्वपूर्णेषु क्षेत्रेषु निर्मितानि आसन् । एतेषां भवनानाम् उपयोगः किमर्थं क्रियते ?
8. भवतां क्षेत्रे किं किञ्चन पुरातनं भवनम् अस्ति ? इदं जानन्तु यत् तत् कियत् पुरातनम् अस्ति अपि च एतस्य संरक्षणं कः करोति ?

**इति चतुर्थाध्यायः**